Click here to go back

॥ श्री महागणपतये नमः ॥
Indian Astrology Source
www.astrovidya.com

## अथ बुधाष्टोत्तर शतनाम स्तोत्रं

ओं बुधो बुधार्चित सौम्योस्सौम्यचित्त शुभप्रदः। दृढव्रतो दृढफल शृतिजालप्रबोधकः॥ सत्यवासत्सत्यवचाः श्रेयसांपतिरव्ययः। सोमजस्सुखदश्श्रीमत्सोमवंश प्रदीपकः॥ वेदविद्वेदतत्त्वज्ञो वेदांतज्ञान भास्करः॥ विद्याविचक्षण विभुर्विद्वत्प्रीतिकरो ऋजः॥ विश्वानुकूल संचारी विशेष विनयान्वितः। विविधागमसारज्ञो वीर्यवद्विगतज्वरः॥ त्रिवर्गफलदोनंतो त्रिदशाधिप पूजितः। बुद्धिमद्बहुशास्त्रज्ञो बली बंधविमोचकः॥ वक्रातिवक्रगमनो वासवो वसुधाधिपः। प्रसन्नवदनो वंद्यो वरेण्यो वाग्विलक्षणः॥ सत्यवत्सत्यसंकल्प स्सत्यसंधो स्सदादरः। सर्वरोगप्रशमन स्सर्वमृत्यु निवारकः॥ वाणिज्यनिपुणो वश्यो वातांगी वातरोगहृत्। स्थूलस्थैर्यगुणाध्यक्षः स्थूलसूक्ष्मादि कारणः॥ अप्रकाशः प्रकाशात्मा घनो गगनभूषणः। विधिस्तुत्यो विशालाक्षो विद्वज्जन मनोहरः॥ चारुशील स्स्वप्रकाशश्चपलाश्चलितेंद्रियः। उदङ्मुखो मुखासक्तो मगधाधिपतिर्हरः॥ सौम्यवत्सरसंजात स्सोमप्रियकरयस्सुखी। सिंहाधिरूढ स्सर्वज्ञ श्शिखिपर्ण श्शिवंकरः॥ पीतांबरो पीतवपुः पीतच्छत्र ध्वजांकितः। खड्गचर्मधरो कार्यकर्ता कुलुषहारकः॥ आत्रेयगोत्रजोत्यंत विनयो विश्वपावनः। चांपेयपुष्प संकाशो चरणो चारुभूषणः॥ वीतरागो वीतभयो विशुद्धकनकप्रभः। बंधुप्रियो बंधमुक्तो बाणमंडल संश्रितः॥ अर्केशासन निवासस्थो तर्कशास्त्र विशारदः। प्रशांतः प्रीतिसंयुक्तः प्रियकृत्प्रियभाषणः॥ मेधावी माधवासक्तो मिथुनाधिपतिः सुधीः। कन्याराशिप्रियो कामप्रदो घनफलाशयः॥ इति बुधाष्टोत्तर शतनामस्तोत्रं॥

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back